वैज्ञानिकीयाध्ययनस्य सौविध्यार्थं एतत् शास्त्रं अनेकेषु विभागेषु विभाजितं कृतम् -

- द्रव्यगुणविज्ञानम्
  - पदार्थविज्ञानम्
  - द्रव्यविज्ञानम्
    - नामरूपज्ञानम्
    - योगविज्ञानम्
      - गुणकर्मविज्ञानम्
      - प्रयोगविज्ञानम्
    - संयोगविज्ञानम्

(क) पदार्थविज्ञानम् - अस्मिन् द्रव्यगुणस्य मौलिक पदार्थानां यथा द्रव्यं, गुणः, रसः, विपाकः, प्रभावः एवञ्च कर्मस्य सैद्धान्तिकीय निरूपणम् भवति।

(ख) द्रव्यविज्ञानम् - ~~अस्याम्~~ अस्यां शाखायां द्रव्याणां अध्ययनं भवति विभागस्यास्य उपविभागत्रयं भवन्ति -

(1) नामरूपज्ञानम् - अस्मिन् द्रव्याणां सम्पूर्ण नामजातिस्वरूपैः सम्पूर्ण परिचयः प्राप्तं क्रियते। स्थूलरचना एवञ्च वानस्पतिकीयविवरणमतिरिच्य तेषां सूक्ष्मरचनायाः अपि अध्ययनं क्रियते। द्रव्याणां प्रकृत्योरुपरि देशकालादिनां प्रभावस्य ज्ञानमपि आवश्यकं भवति।

(2) संयोगविज्ञानम् - अस्मिन् विज्ञाने विभिन्न द्रव्याणां संयोगानां तथा तेषां विविधकल्पनानां वर्णनं क्रियते।

(3) योगविज्ञानम् - विज्ञानेऽस्मिन् द्रव्याणां मात्रा-कालादिनां विचारं क्रियते विज्ञानस्यास्य पुनः शाखे वर्तते -

(क) गुणकर्मविज्ञानम् - विज्ञानेऽस्मिन् द्रव्याणां गुणाः तथा विभिन्न शारीरिकावयवानुसारी तेषां कर्मस्याध्ययनं भवति।

(ख) प्रयोगविज्ञानम् - अस्मिन् विज्ञाने गुणकर्माधारेण द्रव्याणां विभिन्नरोगेषु सांयुक्तिक प्रयोगाः इति निरूप्यते।

Scanned with CamScanner

जन्तुनां शरीरस्योपरि द्रव्याणां यानि विभिन्नानि परीक्षणानि क्रियते तं "प्रायोगिक द्रव्यगुणविज्ञानम्" इति उच्यते।
आतुर शरीरस्योपरि विभिन्नेषु विकारेषु द्रव्याणां कर्मस्य तथा च प्रभावस्य यं अध्ययनं भवति तं "आतुरीय द्रव्यगुणविज्ञानम्" इत्युच्यते।
मानसिक क्रियाणां प्रभावयितुं यानि द्रव्याणि भवन्ति तेषां विशिष्टाध्ययनं "मानस द्रव्यगुणविज्ञानस्य" अन्तर्गते भवति।

Scanned with CamScanner

# पदार्थविज्ञानम्

कस्यापि शास्त्रस्य विवेच्य विषयाणि "पदार्थः" इत्युच्यते। द्रव्यगुणविज्ञानस्य सप्त पदार्थाः सन्ति ते च - द्रव्यं, गुणः, रसः, विपाकः, वीर्यं, प्रभावः, स्वं च कर्मम्।

एतेषामेव विवेचनं द्रव्यगुणशास्त्रे भवति। pharmacology औषध-द्रव्याणामन्ततः एव सीमिता अस्ति। कुत्रचित् द्रव्याणाम् मध्यमार्गी नवीन विभागः उदितः अधुना तस्य नाम "Nutraceutics" इति अस्ति।

(1) द्रव्यम् - रसादि गुणानां तथा वमनादिकर्मणां आश्रयभूत यत् पाञ्चभौतिकविकारः अस्ति सः एव "द्रव्यं" इत्युच्यते। यथा - हरीतकी, बिभीतकः, आमलकीः इत्यादयः। अस्मिन् आहारः औषधः तथा च सद्रव्याणां कृते एव उपयुज्यते।

(2) गुणः - द्रव्यान्तर्निहित शीतोष्णस्निग्धरूक्षादि भौतिक धर्माः गुणः इत्युच्यते।

(3) रसः - द्रव्येषु यत् आस्वादं भवति सः रसः इत्युच्यते। यथा - मधुराम्ललवणकटुतिक्तकषायाः। इदं तेषां पाञ्चभौतिकसंघटनस्य द्योतकं भवति।

(4) विपाकः - जठराग्निपाकस्य अन्ते जायमानरसस्य अन्तिमं परिणामो नाम विपाकः। विपाकस्य प्रकारत्रयं भवन्ति - मधुराम्लकटु।

(5) वीर्यम् - कर्मण्य गुणान् वीर्यं इत्युच्यते। केचन जनाः शीतोष्ण प्रकारद्वयं तथा च केचन जनाः शीतोष्ण-स्निग्धरूक्ष, गुरुलघु, मन्द-तीक्ष्ण प्रकारेण अष्ट प्रकाराः वीर्यस्य मन्यन्ते। वस्तुतः षड् वीर्याणि भवन्ति।

Scanned with CamScanner

(6) प्रभाव: - द्रव्येषु यत् स्वभावविशिष्ट शक्ति: भवति सा एव प्रभाव: इति नाम्ना ज्ञायते। यथा अर्जुनस्य हृद्य:, शिरीषस्य विषघ्न:, खदिरस्य कुष्ठघ्न:, विडङ्गस्य कृमिघ्न: प्रभाव: इत्यादय: ।

(7) कर्म - द्रव्य रसादि गुणौ: पुरुष शरीरे यत संयोग: विभाग: उत्पन्नं क्रियते तं कर्म इत्युच्यते। यथा वमनं, विरेचनं, लंघनं, बृंहणं इत्यादय:।

Scanned with CamScanner